# Shri Durga Ashtottarashatanama Stotram

# श्रीदुर्गाष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Durga Ashtottarashatanama Stotram 2

File name : durgAShTottarashatanAmastotram2.itx

Category : aShTottarashatanAma, devii, durgA, stotra, devI

Location : doc_devii

Description-comments : Bhagavati stuti manjari page 360. See corresponding Namavali

Latest update : July 20, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 20, 2022

*sanskritdocuments.org*

# श्रीदुर्गाष्टोत्तरशतनामस्तोत्रम्

॥ ॐ ॥

॥ श्री दुर्गायै नमः ॥

अथ श्रीदुर्गाष्टोत्तरशतनामस्तोत्रम् ।
ॐ दुर्गा शिवा महालक्ष्मीर्महागौरी च चण्डिका ।
सर्वज्ञा सर्वलोकेशा सर्वकर्मफलप्रदा ॥ १ ॥

सर्वतीर्थमया पुण्या देवयोनिरयोनिजा ।
भूमिजा निर्गुणा चैवाधारशक्तिरनीश्वरा ॥ २ ॥

निर्गुणा निरहङ्कारा सर्वगर्वविमर्दिनी ।
सर्वलोकप्रिया वाणी सर्वविद्याधिदेवता ॥ ३ ॥

पार्वती देवमाता च वनीशा विन्ध्यवासिनी ।
तेजोवती महामाता कोटिसूर्यसमप्रभा ॥ ४ ॥

देवता वह्निरूपा च सदौजा वर्णरूपिणी ।
गुणाश्रया गुणमयी गुणत्रयविवर्जिता ॥ ५ ॥

कर्मज्ञानप्रदा कान्ता सर्वसंहारकारिणी ।
धर्मज्ञाना धर्मनिष्ठा सर्वकर्मविवर्जिता ॥ ६ ॥

कामाक्षा कामसंहन्त्री कामक्रोधविवर्जिता ।
शाङ्करी शाम्भवी शान्ता चन्द्रसूर्याग्निलोचना ॥ ७ ॥

सुजया जयभूमिष्ठा जाह्नवी जनपूजिता ।
शास्त्रा शास्त्रमया नित्या शुभा चन्द्रार्धमस्तका ॥ ८ ॥

भारती भ्रामरी कल्पा कराली कृष्णपिङ्गला ।
ब्राह्मी नारायणी रौद्रा चन्द्रामृतपरिश्रुता ॥ ९ ॥

ज्येष्ठेन्दिरा महामाया जगत्सृष्ट्यादिकारिणी ।

ब्रह्माण्डकोटिसंस्थाना कामिनी कमलालया ॥ १० ॥

कात्यायनी कलातीता कालसंहारकारिणी ।
योगिनिष्ठा योगिगम्या योगिध्येया तपस्विनी ॥ ११ ॥

ज्ञानरूपा निराकारा भक्ताभीष्टफलप्रदा ।
भूतात्मिका भूतमाता भूतेशा भूतधारिणी ॥ १२ ॥

स्वधानारीमध्यगता षडाधारादिवर्तिनी ।
मोहदांशुभवा शुभ्रा सूक्ष्मा मात्रा निरालसा ॥ १३ ॥

निम्नगा नीलसङ्काशा नित्यानन्दा हरा परा ।
सर्वज्ञानप्रदाऽनन्ता सत्या दुर्लभरूपिणी ।
सरस्वती सर्वगता सर्वाभीष्टप्रदायिनी ॥ १४॥

॥ इति दुर्गाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

*Shri Durga Ashtottarashatanama Stotram*
pdf was typeset on July 20, 2022

Please send corrections to *sanskrit@cheerful.com*